This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-479

कविकुलगुरु कालिदास संस्कृत
विश्वविद्यालय ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M 479 विषय पुराण

नांव- त्र्यंबक महात्म्य M...

लेखक/लिपीकार ....

पृष्ठ 39 (8, 9, 34, 39, 40 पृष्ठे गहाळ)

काळ .... पूर्ण/अपूर्ण ....

M-479

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ श्रीकुळदेवतायैनमः ॥ ऋषय ऊचुः ॥ सूत सूत महा
प्राज्ञ वेदवेदांगपारग ॥ त्र्यंबकक्षेत्रमाहात्म्यं श्रोतुमिच्छास्ति नो मुने ॥ १ ॥
सूत उवाच ॥ यूयं धन्यतमा लोके परोपकरणे रताः ॥ यद्विद्या सर्वका
र्येहि धर्मे च चरिताः सदा ॥ २ ॥ एकतः सर्वतीर्थानि त्र्यंबकक्षेत्रमेक
तः ॥ तुल्यया तोलये द्धात्रा त्र्यंबकं तु विशिष्यते ॥ ३ ॥ त्र्यंबकक्षेत्रमाहात्म्यं
वक्तुं शक्नोन कश्चन ॥ स्वर्गे मर्त्ये च पाताले सिद्धक्षेत्राणि संति हि ॥ ४ ॥
त्र्यंबकक्षेत्रसदृशं न तथापि विलोकितं ॥ यथा मेरुर्गिरींद्राणां सर
सां सागरो यथा ॥ ५ ॥ नक्षत्राणां यथा चंद्रो ग्रहाणां भानुरेव च ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदीनांचयथागंगापृथातामोन्त्पेषुचाब्धिः।।तथेदंत्र्यंबकक्षेत्रंसर्वक्षेत्रेषुश्रे
ष्टते।।भुक्तिदंमुक्तिदंचैवसर्वदुःखविनाशदेवं।।७।।इहार्थेकथयिष्या
मिश्वेतस्यदीनंनासह।।संवादंवेदविदितंयस्यश्रवणमात्रतः।।८।।ब्र
ह्मामुच्यतेपापात्अन्येषांतत्रकाकथा।।आसीत्पुराकृतयुगेश्वे
तोनामनृपोत्तमः।।९।।शिवभक्तःशिवप्राणःशिवध्यानरतःसदा।।
सकदाचिद्द्विजन्मार्गेतीर्थयात्रेछयानृपः।।१०।।नदीनंवीक्ष्यपप्र
छतीर्थानिविविधानिच।।त्र्यंबकस्यक्षेत्रमाहात्म्यपप्रछविशेषतः।।११।।
श्वेतउवाच।।त्र्यंबकक्षेत्रमाहात्म्यंविस्तराद्वक्तुमर्हसि।।नदीक्षेत्रस्वरूपवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरा तारकनाशाय पार्वत्या योजनं शिवं ॥१२॥ देवाश्च ऋषयश्चैव गंधर्वा
प्सरसस्तथा ॥ कैलासे रचिते प्रासादे शिवयासह ॥१३॥ गृहस्था
श्रममासाद्य शंकरः सुखमन्वभूत् ॥ कदाचित् पार्वती देवी शिवं
पतितं वि ॥१४॥ उक्त स्पर्शानेन दुःखाक्रांतं पप्रच्छ शंकरं ॥ पा
र्वत्युवाच ॥ स्वामिन् किमर्थं दुःखं ते सत्यं मां वद शंकर ॥१५॥ त्वमस्य जगतः
कर्त्ता संहर्त्ता परितोषकः ॥ तव दुःखस्य हेतुश्चेत् नपश्या जगत्त्रये ॥१६॥ अ
नंत दुःखिनो लोकाः मनुष्याः पशवो मृगाः ॥ एते रवसेरस्य स्पर्शाः भवंतीति
विशेषतः ॥१७॥ सर्वज्ञस्य निरीहस्य परिपूर्णस्य ते प्रभो ॥ सर्वदा व्यग्रता
कस्मात्त्वं वेगाद् हृत्तुमर्हसि ॥१८॥ किं ते हृदि महद् दुःखं किं त्वं ध्यायसि नित्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दा॥ स संवद महादेव यदि भक्तोस्मि ते विभो॥१९॥ श्रीवटुक उवाच॥ मां ध्याय
ति जगत्सर्वं मि हे ध्यायामि तत् सदा॥ नानारोगैश्च शोकैश्च व्याधिभिः प
रिपीडितं॥२०॥ ब्रह्महत्यादिकैः पापैश्च दारिद्रेण विशेषतः॥ अहं बल्वासु
रैर्बद्धोत्यय निगडय प्रिय॥२१॥ वेलासस्थापितो हे कुटुंबासंकर्मा
नसः॥ यदा स्मरामि तद्विघ्नं तदाक्षपरिज्यायते॥२२॥ स्याद्वैरूपमास्थाय
॥२॥ प्रपिव्यां जगतो हितं॥ केनंष्प्यामितिमेवां ध्यासवेद्याहृदिवर्तते॥२३॥ अपु ॥२॥
त्राणां च पुत्राश्च दरिद्राणां धनागमः॥ रोगिणां रोगमुक्तिश्च पातकानां
विनाशनं॥२४॥ इदं परोपकारेण न पंजन्मेति मे मतिः॥ अश्वमेधसहे
स्त्राणि वाजपेयशतानि च॥२५॥ परोपकारपुण्यस्य कलां नार्हति षो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उषी ॥ आलोक्य सर्वशास्त्राणि वेदान्स्मृतियुतान्प्रिये ॥ २६ ॥ इदमेकं मया
ज्ञातं मुपकारसमं नहि ॥ तस्मान्मम पेच्छा सततं परोपकरणे प्रिये ॥ २७ ॥ करोमि न
पुत्रान्कोमिके कासेस्त्रापितः सुधैः ॥ निमित्तं तु विना भद्रमो मया गंतुं न शक्यते ॥ २८ ॥
इति मे दुःखहेतुत्वं जानीहि हिमवत्सुते ॥ पार्वत्युवाच ॥ अहं मया तव विभो
निमित्तानां ज्ञातानि मे ॥ २९ ॥ विदितानि महादेवस्यनुज्ञां दातुमर्हसि ॥ त्वया
ज्ञात्वा जगन्नाथ निमित्तं विसृजाम्यहं ॥ ३० ॥ शिव उवाच ॥ अवश्यं गच्छ भद्रं
ते कार्यं कुरु नगात्मजे ॥ नंदिकेश्वर उवाच ॥ तेनाज्ञप्ता महामाया तस्थौ एण
तब्रह्मणः पदं ॥ ३१ ॥ समेस्पतस्पहृद पप्रविश शत्रिवाङ्मया ॥ तया व्याप्तो
विधाता स नेमनेकंच न प्रभुं ॥ ३२ ॥ अहमेव जगत्स्वामि मिमदं सकलं जगत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदाचिद्विष्णुनासार्द्धं देवैर्ब्रह्मपुरोगमैः॥३३॥ निंनिंदक्षोमहादेवंमाययामो-
हितोविधिः॥ विष्णुस्तत्रेदमवदत्किं धातर्निंदसे शिवं॥३४॥ महात्म्यं देवदेवस्य
शंकरस्यमहात्मनः॥ नोनास्तिविदितंकिंचित्तत्थैवश्लाघ्यसेकथं॥३५॥
यस्यवेदानचत्वारोरूपंविंदंतितत्त्वतः॥ अगाधंयस्यरूपंहिअंतोयस्यन
विद्यते॥३६॥ अहंवर्षसहस्राणिकोटिशस्तपसिस्थितः॥ गंधमादन
मासाद्यतस्यांतंदृष्टया॥३७॥ त्रैलोक्यस्यापकारेणपुण्यंमेसंचितंब-
हु॥ तथापिदेवदेवस्यपादौनैवविलोकये॥३८॥ अजानन्नंदेवंचकथंनि-
दसिभोविधे॥ इतिविष्णुवचश्श्रुत्वाब्रह्मावचनमब्रवीत्॥३९॥ ब्रह्मोवाच॥
विष्णोत्वंनैवजानासिनत्वंतोवेद्म्यहंशिवं॥ शिवरूपंसर्वंमेविदितंमधुसू-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दन ॥४०॥ महिमानमहं वेद्मि गिरिजावल्लभस्य च ॥ इति ब्रह्मवचः श्रुत्वा विष्णु
र्वचनमब्रवीत् ॥४१॥ विष्णुरुवाच ॥ त्रैलोक्यैककः पुमानस्ति यः शिवे चेति स्वतः ॥
इत्थं विवदतोरेवमुभयोर्विष्णुब्रह्मणोः ॥४२॥ व्यतीयाय महान्कालस्तत्र देवा
विजिगीषुः ॥ तत्रैयं निश्चयं कृत्वा ब्रह्मा विष्णुस्तथैव च ॥४३॥ ब्रह्माब्रवीदहं या
मि शिवमूर्ध्नि तु मस्ते धृतः ॥ विष्णुरप्याह यास्यामि शिवपादौ समं चित्तं ॥४४॥ इत्ये
वं निश्चयं कृत्वा ब्रह्मा मूर्ध्नि गतस्तदा ॥ विष्णुर्यातो महादेवपादौ दृष्टेन पातालम् ॥
४५ ॥ परस्परं तु देवेसं घोषु विख्याता तो त्रिविष्टपात् ॥ ब्रह्मा तत्र क्रियत्कृत्वा युगानां
कोटिरेव च ॥४६॥ श्रान्तो न प्राप्य मूर्धानं शंकरस्य महात्मनः ॥ ततस्तत्रास्ति ज
ह्नुं केतकीपुष्पसंकुलं ॥४७॥ तं आह तुं विज्ञो दास्यव क्लेम हेसि नो ततः ॥ तत
आह विधिर्व्यग्रं मिथ्यासाक्षित्वं विधीयतां ॥४८॥ नाभ्यागमो मितिसाक्षे धाता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हर्षयुतो ययौ ॥ तथैव तावत्कालं च विष्णुर्गत्वा रसातलं ॥४९॥ नालभत्पदयोरंतं
यथापूर्वमसौ ययौ ॥ उभौ त्रिविष्टपं गत्वा कृपयां चक्रतुः सुरान् ॥५०॥ तत्र ब्रह्मा
ब्रवीद्देवान् अहमूर्ध्वं मितो गतः ॥ शिवमूर्धानमासाद्य हस्ते च समागतः ॥५१॥ का
मधेनुमयं तत्र दोहिता कांस्यभाजने ॥ अस्यास्तु पयसा शंभुरभिषिक्तो मया
सुराः ॥५२॥ केतकैः कुसुमैः पूजा विहिता मस्तके मया ॥ विष्णुराह मया नैव पादौ
५ दृष्टौ जगत्प्रभोः ॥५३॥ मे दृष्टौ तौ न मया लब्धौ पादयोस्तस्य का कथा ॥ नंदिकेश्वर० ॥ ४५
तयोरेवं वचः श्रुत्वा देवा संशयमाययुः ॥५४॥ ततः कैलासमगमन् देवाश्चेंद्रपुरोग
माः ॥ ब्रह्मा विष्णुं पुरस्कृत्य पप्रच्छुः जगत्प्रभुं ॥५५॥ ब्रह्माद्या देवतास्तत्र शिवं नत्
वा यथाक्रमं पप्रच्छुर्ब्रह्मणा पूजा विराटस्य कृता न वा ॥५६॥ सत्यं ब्रूहि महादे
व पंचत्वाशावादिविलोः ॥ नंदिकेश्वर उवाच ॥ एषैव ब्रह्मणः कर्म ज्ञात्वा हरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुःसदाशिवः॥५८॥ अतीतानागतज्ञानी येन दृष्टि जगत्प्रभुः॥ केतकी
मयापवत्सूर्वे त्वमस्य शपात्भविष्यसि॥५९॥ मत्पूजावर्जितो निधेनोत्वं पुरीषं भ
क्षयिष्यसि॥ अमेध्यास्त्वजंतून नामपात्रमात्रभविष्यसि॥५९॥ ब्रह्माण
मयापत्वक्रोधात्त्वरांकरा लोकशंकरः॥ यस्मात्वं विद्युनासा धूर्ते अपूजं च मक्त
वानसि॥६०॥ अपरश्च तवाभ्यर्च्यां येकरिष्यतिमानवाः॥ तेपानुनरक
घोरं यावदिंद्राश्चतुर्दश॥६१॥ इति प्रशप्तो देवेन ब्रह्मा लोकपितामहः॥
चुक्रोश सुतरां शोकोर्मयपामाहितपर॥६२॥ ब्रह्मोवाच। जेउ त्वं मां
नजानासि ब्रह्माणं लोकविश्रुतं॥ जेउ त्वेन त्वपाराशो ह्य प्रज्योति
हितोधुना॥ जेउः पर्वतरूपस्त्वं मच्छापाद्भव शंकर॥ इतिशप्तो महादेवो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मणाघोरकर्मणा॥६४॥पर्वतंरूपमास्थायकैलासादुपतवृक्षितौ॥
यत्रोपत्रागमंपूर्णसुरत्नत्रसंहारमातेनोत॥६५॥चूर्णिताबहवोवेदो:
ग्रामोश्चनगराणिच॥अकालप्रलयोस्यासीत्भूलोकेवसतांनृणां
॥६६॥तत्रस्थितांतास्तुरोदेवाप्रक्योद्विभमानसा:॥नकेचित्शरणंजग्मुश्चि
५॥ लेख्याइवाभवन्॥६७॥ज्वालाभिज्वालयन्लोकान्प्रलयानलसंनि
भ:॥मापपापिविधिर्मुक्तस्तूष्णीमासीदधोमुख:॥६८॥मुहुर्मुहुर्हरिदंष्ट्रा
हकिमिदंकारितंमया॥तत:समंतब्रह्माणिगगानेदितिजान्प्रति॥६९॥वा ५॥
णीरुवाच॥सह्याद्रे:शिखरंगत्वायावद्यातिस्सरिद्वतिं॥तावत्वंत्र्यम
तोभूत्वास्तंपमास्थायपावर्तं॥७०॥ब्रह्माहरिश्चरुद्रश्चप्रार्थयंतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महेश्वरं ॥ भवद्भिः प्रार्थितः शंभुस्तत्र स्थास्यति श्वो सुराः ॥ ७१ ॥ भक्त्यानापु
रयन्नुक्त्वा मा नन्त्र्यंबकाख्यां गनिष्यति ॥ नंदिरुवाच ॥ ततो ब्रह्मा च विष्णुश्च
शचिभर्त्ता तथैव च ॥ ७२ ॥ पार्वतं रूपमास्थाय ययुः सत्याद्रिसंनिधौ ॥
पश्चिमस्यां दिशि विघ्नं दृष्ट्वा मार्गविरोधकं ॥ ७३ ॥ शंकराख्यो गिरिः पावक
पश्चाद्भवेलि सर्वतः ॥ तावत्पर्वतरूपेण शंकरोप्यासीत् सुरेश्वरः ॥ ७४ ॥ ते
तरस्ताघकरादृष्ट्वा त्रिभिः सुरैः महात्मनः ॥ त्रिभिर्नेत्रैश्च भीनूं देवानाआ
पश्यद्गिरिजापतिः ॥ ७५ ॥ ततः शक्रेण विधृतो पादौ शंभोर्महात्मनः ॥
त्र्यंबकं त्राहि त्वां नाथ वद ताव जपाणिना ॥ ७६ ॥ ततस्तं प्रार्थयामासु
ब्रह्मा विष्णुः शचिपतिः ॥ स्तोत्रैर्नाविधै दिव्यैस्तुष्टुवुस्त्र्यंबकं गिरं ॥ ७७ ॥
ततः प्रहृष्ट हृदयस्त्र्यंबकोऽद्य सुरान्प्रति ॥ मदिच्छया इतं सर्वं भवंतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विगतज्वराः ॥७८॥ निजसृष्टानां निगमस्तुतिशाम्यत्रैवलीलया ॥ नक्रो वैरा
सकरूपं पर्वतं मामकं सुराः ॥७९॥ तरवो मम पुरो मातिः ट्षदो वपवा मम ॥ ए
वं रूपमहं धृत्वा तावत्स्वास्य सुरोत्तमाः ॥८०॥ यावत्तिष्ठमि रियं धत्ते स
शैलवनकाननं ॥ विष्णुरुवाच ॥ अहं प्रेष्यो चराके व्यतिष्ठामत्तो समंत
तः ॥८१॥ तव पत्रस्य विघ्नानि नाशयामो निरंतरं ॥ नंद्युवाच ॥ इतिवि
ष्णुवचः श्रुत्वा शंकरः साधुमन्यत ॥८२॥ विधिर्हरिहरो ब्रह्मा सत्यमानी
समताः सकलविविधकामा नूमानुषाणां विधातुं ॥ क्षितिधरवररूपा
यादृदानाः पृथिव्यां स्मरणविहितदोषाः किंचितास्तमयप्रघ ॥८३॥ ५
इति श्रीपद्मपुराणे क्षेत्रमाहात्म्ये प्रथमोध्यायः ॥१॥ नंदिकेश्वरउवाच ॥
पश्चात्तापं समापन्नो ब्रह्मालोकपितामहः ॥ त्र्यंबकाद्रिं समासाद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तपस्तप्तुं मनो दधे ॥१॥ कमण्डलुजलैस्तीर्थं निर्ममानस्य हेतवे ॥ कोटिती
र्थमिति ख्यातं निर्ममे विश्वभावनः ॥२॥ निराहारो यतात्मा च समाधौ
नियतो विधिः ॥ यज्ञैर्नानाविधैर्भव पूजयामास त्र्यंबकं ॥३॥ अल्पेनै
व च कालेन परितुष्टः सदाशिवः प्रत्यक्षमभवद्धातुः वरं ब्रूहीति चाब्रवी
त् ॥४॥ ब्रह्मोवाच यन्मया निंदितः पूर्वमज्ञानेन भवान् प्रभो ॥ तत्सर्वमपरा
धं मे क्षंतुमर्हसि त्र्यंबक ॥५॥ त्र्यंबक उवाच ॥ मे वरं ब्रूहि विधे किं चिन्न मे
भेदोस्ति ते धे चितः ॥ तवैव नाम्ना लोकेस्मिन् ख्यातिमेष्यामि पद्मज ॥६॥
ब्रह्माद्रिरिति मे नाम भक्त्या विख्यातिं गमिष्यति ॥ इदं तु निर्मितं तीर्थं कोटि
तीर्थमिति स्मृतं ॥७॥ अत्र यस्तर्पयेत्पितॄन् स्नात्वा देवानृषिन् गणा
न् ॥ स कोटिपूर्वजैः सार्द्धं स्वर्गे वसति मानवः ॥८॥ इति दत्त्वा वरान्शं

भुस्तत्रैवांतरधीयते ॥ नंदिके० । अपंब्रह्मा गिरिक्षिप्ता दशात्सशंकरोयंनसं
शयः ॥९॥ सद्योजातमितिख्यातं प्रथमंलिंगंउच्यते ॥ वामदेवोद्वितीयस्तु
तृतीयोघोरसंज्ञकः ॥१०॥ चतुर्थस्तत्पुरुषश्चइशानः पंचमस्तथा ॥ एतेस्तु
पंचशिवलिंगेष्वेकैकोसौविराजते ॥११॥ पूर्वस्यां मस्यग्रामस्तत्रैजेना
च्छसंज्ञकः । पश्चिमस्यां हरिः साक्षाद्ब्रह्मालोकपितामहः ॥१२॥ विज्ञा
६ तिक्रोशमात्रंयत्क्षेत्रंमुक्तिप्रदंनृणां ॥ चत्वारःपर्वताराजन्नदेवरूपान
संशयः ॥१३॥ एतद्दर्शनमात्रेणपापराशिर्विलीयते ॥ एतानिपंचलिंगानि
ब्राह्मैःकथितानिते ॥१४॥ तेषांदर्शनमात्रेण पुनर्जन्मनविद्यते ॥ इहा
थैकथइष्यामिकथामेकांपुरातनीं ॥१५॥ आसीत्पुराकृतयुगेनलिनाम
मथरूपतिः ॥ वेदंसनिंदते नित्यंब्राह्मणान्निंदते नित्यं ॥१६॥ विप्रद्वंव्याति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भयमासीद्यदापुरा ॥ तदापि तेन देवेन तान्हत्वा सुखिनः कृता ॥१९॥ स देवकृत्वैष्णूतानां
कार्यत्रयकरप्रभुः ॥ तस्मात्स्मद्रक्षणेणचित्रं नास्ति किंचिन्महामुने ॥२०॥ स एव जगं
तां सक्षी सर्वज्ञः सर्वभावनः ॥ तस्मान्नास्त्यपरः कश्चित्सर्वलोकहितप्रदः ॥२१॥ इ
ती तद्वचनं श्रुत्वा विष्णुकाननमायये ॥ नारदस्तानुवोचेदं प्रहसन्प्रकृयागिरा ॥२२॥
नारदउवाच ॥ सत्यमुक्तं द्विजश्रेष्ठाः शंकराख्यानमुत्तमं ॥ ईश्वरः सर्वलोकानां क
र्ताजगत्पतिः ॥२३॥ गीयंते सर्ववेदेषु स एवैकः सुरोत्तमः ॥ तेनेदं पर्वतं रूपं धृत्वा
विश्वहितं कृतं ॥२४॥ नैवच्चित्रमिदं शंभो विष्णौ त्रैलोक्यव्यापके ॥ कश्चि
द्विष्णुसमो जीवो कुरुते कार्यमिदृशं ॥२५॥ पूर्वजन्मकृते पुण्ये बलैश्वर्यसमांन्वितः ॥
मछकछपयानीषुश्चरामतेपस्तु सर्वदा ॥२६॥ तेनास्मिन्नश्वतां कार्ये किं का यद्वि
जसत्तमाः ॥ चतुर्भुजोस्यतो विष्णुर्जैनैः कर्त्रेति गीयते ॥२७॥ मूढस्तेनेव जानंति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येकेचिदाहुरव्ययं॥अनेनैवप्रकारेण विष्णुस्यात् जगतांपतिः॥२८॥कार्त्तवीर्यादिभूपालैः कोपराधःकृतोस्तिवः॥जमदग्निसुतःकोयेनायंसमुद्धरणं पयो॥२९॥नंदिकेश्वर
इतितद्वचनंश्रुत्वा विष्णुभक्तिपरा द्विजाः॥चुक्षुभुः शिवभक्त्याचेष्णुमर्त्यौपिं धादि
दंजगुः॥३०॥अहो किंन्नैवजानातिविष्णुस्त्रैलोक्यनापकं॥शूद्राः पाखंडिनो
भ्राताः सर्वदाविधिनाहताः॥३१॥दैत्येद्रभारसंक्रांतांमग्नां [illegible] रसा मि५
तले॥उद्धारजगन्नाथो दंष्ट्रया कोलरूपधृक्॥३२॥रोमकूपे जगत्सर्वं यस्य
विष्णोर्महात्मनः॥तं देवंजीवमाहुर्ये तेनलज्जंतिकिंहताः॥३३॥पिशाचाधि
पतिः कश्चित्मुंडमालाविचित्रितः॥स्मशानेषुवसन्नित्यं चिताभस्म
विधूलितः॥३४॥गजचर्मांबरोवृद्धो वृषारूढः सदाशिवः॥ईदृशं च मंग
लंजीवं येवदंतिजगत्पतिं॥३५॥तेषामंते यमः किंकिंकरिष्यतिनविद्महे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंदिकेश्वर उवाच ॥ विष्णुभक्तवचः श्रुत्वा चुक्षुभुः शिवपूजकाः ॥ ३६ ॥ शैवा ऊचुः
मच्छकच्छपयोनिषु भ्रमते यस्तु सर्वदा ॥ कश्यपस्य सुतो जातः स कथं कथ्यते भुवनेश्व
रः ॥ ३७ ॥ इत्थं विप्रास्तदा सर्वे वादं चक्रुः परस्परं ॥ वाक्शरैस्ताडयंतस्ते सकोपं दि
नपंचकं ॥ ३८ ॥ त्यक्ताभोज्यं द्विजाः सर्वे कलहे कारिणो मुनिः ॥ सांत्वयन्
श्लक्ष्णया वाचा वसिष्ठो व्याकुलोभवत् ॥ ३९ ॥ वसिष्ठ उवाच ॥ ऋषिणां भ्रमना
शार्थं कः समर्थोधुना भवेत् ॥ मायया मोहितानां च तयोः शंभुं विना हरिं ॥
४० ॥ तस्मात्सर्वप्रकारेण विप्रश्चांतिं व्यपोहतु ॥ प्रार्थयिष्ये शिवं विष्णुं तौ वि
नान्यास्ति मे गतिः ॥ ४१ ॥ इत्थं विचार्य विप्रेंद्रो वशिष्ठः सर्वविन्मुनिः ॥ ब्रह्माद्यैः
सन्मुखोभूत्वा देवौ स्तुतुं प्रचक्रमे ॥ ४२ ॥ वसिष्ठ उवाच ॥ यो देवो भुवनत्र
यस्य जनकः सच्चित्स्वरूपो विश्वेश्वरः शौ गिरिजापयोधितनया नाथो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्षुःश्रवांतकौ ॥ अनंदात्मकतां गतौ हरिहरौ सिद्धादिभिः सेवितौ विप्राणां श्रमा
वारणाय शरणं ताभ्यां प्रपन्नोस्म्यहं ॥४३॥ यो देवो जगतः स्थितिप्रलययोर्हे
तुर्जगत्पावनो यन्नाम स्मरणेन कर्मफलदं व्यंग्यं जनानामिह ॥ आनंदात्मक
तां गतो जनमनः संतोषसंवर्द्धको विप्राणां श्रमवारणाय शरणं ताभ्यां प्र० ॥
॥४४॥ इति स्तुतौ तेन मुनीश्वरेण देवो भवानीपतिवासुदेवौ ॥ स्वकीयरूपे ज
ता विमोहने प्रत्यक्षतां प्रापयतुः स्म साक्षात् ॥४५॥ तत्रागत्य जगन्नाथो मा ११
११८ देवो ब्रवीन्मुनिं ॥ वरं ब्रूहि [illegible] ते आरं धन्यायुतो मुनिः ॥४६॥ तयोर्वचनं
मार्कण्डेय वसिष्ठो वाक्यमब्रवीत् ॥ धन्योस्मि हे तपुण्योस्मि सभाग्योस्मि चरा
चरे ॥४७॥ प्राप्तोहं हरिहरौ दृष्ट्वा साक्षात्त्वं जगन्मनो मम ॥ नन्नामचरणान्नून
राजन्नस्यैवाच्यमनस्वेप्सितं ॥४८॥ पश्यत्स्तुर सर्वविप्रेषु वांछं न वेद्मि जेत्तमाः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदि तुष्टोसि युवां मह्यं प्रार्थये हं हितं मम ॥४९॥ युवयोर्मायया विप्राः मोहितास्संति
सांप्रतं ॥ येन तत्त्वं तिन्नाशः स्यात्तत्त्वं हि धेयं जगद्धितं ॥५०॥ नंदीकेश्वर उवाच ॥
इत्थं मुनिवचः श्रुत्वा विलोक्य च परस्परं ॥ देवो हरिहरौ साक्षादेकरूपमवा
पतुः ॥५१॥ एकतो जलदश्यामं परतो स्फटिकप्रभं ॥ एकतः पंचवक्त्राऽपि प
तो वदनं शुभं ॥५२॥ एकतस्सनपासिंधोः परतो गिरिकन्यका ॥ एकतस्तु ज
टाजुटो परतो मुकुटोत्तमः ॥५३॥ एकतो दशहस्तश्च परतोश्च चतुर्भुजः ॥ ए
कतश्चंद्रचूडश्च परतो स्तिलकान्वितो ॥५४॥ एकतो गजचर्माऽपि परतो व
सनानि च ॥ एकतो हेमभूषाश्च परतो रत्नभूषणं ॥५५॥ एकतो गरुडः पक्षी
परतो वृषभो महान् ॥ एवमेकं परं रूपं दृष्ट्वा ते विस्मयं ययुः ॥५६॥ तद्रूपं परमं
दिव्यं कोटिसूर्यसमप्रभं ॥ दृष्ट्वा देवाश्च गंधर्वा विप्राश्च विस्मयान्विताः ॥५७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो विवाहवज्ञातिमिसुचुस्तेपरस्परं॥ लज्जिताः शरणं प्राणुर्दिव्यरूपंमहात्मनः॥५८॥
ननमुश्चरणंभोजं भेदबुद्धिंविहायते॥ अपराधं क्षमस्वेति देवदेवजगत्पते॥५९॥नु
चुस्तोत्रवर्यैश्चनमंतश्चपुनःपुनः॥ चुचुस्तेदेवदेवशंजगदीशंद्विजोत्तमाः॥६०॥
विप्राऊचुः॥ इदंतीर्थंपरंदेवत्रंभेदंबुद्धिनिवारणं॥ त्वत्प्रसादेनदेवेशसर्वदास्तु
जगत्पते॥६०॥ ततोजगाद देवेशोहरिशंराख्योजगत्पतिः॥ एवंद्विजःप्रार्थितंविप्रा
स्तत्तथास्तुममाज्ञया॥६१॥ अस्मिन्तीर्थेनरःस्नात्वाद्दृष्ट्वास्तंत्र्यदेवताः॥पि
तरःश्चौद्विजाःसर्वेसयांतुपरमांगतिं॥६२॥ श्लोकद्वयमिदंपुण्यंवसिष्ठेनकृतंमम
तद्विप्रःपठतेभक्त्यानरोपिप्रयातुपरांगतिं॥६३॥ अहमप्यत्रतिष्ठामिहरिशंराख्या
द्विजोत्तमाः॥ अत्रत्यजंतुरनेकर्मब्रह्मसायुज्यमाप्नुयात्॥६४॥ नंदिकेश्वरउवाच
इत्युक्त्वातोनदेवेनहरिशंयाद्विजोत्तमाः॥ भेदबुद्धिंपरित्यज्यअंतर्धेविष्णुरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलै ॥९५॥ इति ते कथितं राजन् हरीशाख्यानमुत्तमं ॥ यः श्रृणोति नरो भक्त्या सो
पि पापैः प्रमुच्यते ॥९६॥ इति श्रीपद्मपुराणे त्र्यंबकमाहात्म्ये तृतीयोध्यायः ॥३॥
श्वेत उवाच ॥ त्रिसंध्याक्षेत्रमिति यत्प्रवदंति मनीषिणः ॥ तस्याख्यानं च मे ब्रू
हि विस्तरान्नंदिकेश्वर ॥१॥ नंदिकेश्वर उ० ॥ विष्णुरूपा महासाध्वी ब्रह्मलोकपि
तामहः ॥ सृष्टिमारभयांचक्रे प्रथमं स्वप्रसिद्धये ॥२॥ सर्वेपि लोका विहिता
मर्त्यलोकविवर्जिताः ॥ धत्ते ह्यपाद्य निभूतास्तपरं रक्तस्य परमधौषं न ॥३॥ २६
एकवेवाहमे सर्वं त्रैलोक्यं सचराचरं ॥ तां वै तथाविधां दृष्ट्वा ब्रह्मा भ्रममनोरथः
॥४॥ तां विभज्य पुनश्चक्रे त्रिदिनस्थापि नीविधिः ॥ रुदंती पुत्रजा निसर्गे गेहे
गेहे दिवानिशं ॥५॥ ततः दृष्ट्वा दुःखितो ब्रह्मा तां बभ्रंजयथापुरा ॥ पुनः संपति
संपुन्नां स ऋषिं चक्रे नियुषं ॥६॥ सर्वेपि स्वामिनो ज्ञाताः कैः क्रिं चिन्नैव मन्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रमत्तां तां समालोक्य ब्रह्मं जातीव दुःखितः ॥ ८ ॥ पुनर्दारिद्र्यतो चक्रे स्यात्प्रिलो
कपि ताम हः ॥ परिभ्रमति सततं लोकास्य च्चार्थिनो जनः ॥ ९ ॥ केचित्यतं लिमा
गेषु स्वन्नाचादनकांक्षिणः ॥ अन्योन्यस्यापी मांसानि भक्षमाणास्तथा पा
परे ॥ ९ ॥ स्वयमेवतु सा सृष्टिर्नाशं प्राप्ता नराधिप ॥ ततोतिदुःखितो ब्रह्मा किं
करोमीत्यचिंतयत् ॥ १० ॥ श्रुत्वा चैनं वाणीं बाह्मणं खिन्नमानसं ॥ वा
णीरूवाच ॥ ब्रह्मा द्रिं गच्छ भद्रं ते कर्मध्ये यिनिरंतरं ॥ ११ ॥ कर्मणस्याम हाराज
१३ ततः सुखमवाप्स्यसि ॥ नंदिके ॥ ब्रह्मा श्रीरंगिगु चात तपस्तेपे तिदारुणं ॥ १२ ॥
षष्टिं च वर्ष सहस्राणि निरहारो जितेंद्रियः ॥ तिस्मो [illegible] रवाः [illegible] ण तस्य ब [illegible] वु १३
द्धि गोचरा ॥ ततो ब्रह्मा पुनस्तापेलक्ष पेषांणि प्रपत्ते ॥ ततः कं न्या
श्रेपं तस्य द्यु [illegible] चरम प्रभूतदा ॥ १४ ॥ ततस्ता ब्रह्मणा [illegible] युपका इति देवताः ॥
ततस्तसु [illegible] स्ताद ध्यो ब्रह्माणं प्रतिपद्रूपते ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिस्त्रः संध्यास्वयं ब्रह्मन्नवयं मूकं हि कर्मणः॥ कर्मणे तुभ्यं प्रदास्यामस्ततः
सुखमवाप्स्यसि॥१५॥ ततो व्याहृतां कर्मब्रह्मणा संप्रपद्यथा॥ ब्रह्म
न्नमस्य पदवीं कर्मणो देहि शाश्वतीं॥१६॥ कर्मोवाच॥ अहमेकं करिष्या
मि त्वमेकं चेत्करिष्यति॥ तेन कार्यविनाशः स्यान्ममस्याद्दायुषक्षयः॥१८॥
च यद्येवं चेत्प्रकर्त्तव्यं मम मुक्तिं दुर्लभमस्तिहि॥ इत्युक्ते कर्मणा वाक्यं ब्रह्मा
वचनमब्रवीत्॥१९॥ ब्रह्मोवाच॥ त्वेयेव सर्वं कर्त्तव्यं सुष्टुदुष्टमथापि वा॥
नाहं तदन्यथा कुर्यामिति मे शपथं शृणु॥२०॥ ब्रह्महत्यासु यत्पापं महा
पं मद्यसेवने॥ तेन पापेन लिप्यामि चेत्कुर्याम न तं वचः॥२१॥ परस्त्रि
दासु यत्पापं सूतकान्नस्य भोजने॥ तेन पापेन लिप्यामि चेत्कुर्या
त्र आनतं वचः॥२२॥ यत्पापं मातृहत्यायां यत्पापं पंक्तिभेदने॥ तेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पापेनलीप्यामीचेत्कुर्यामन्नतं वचः ॥२४॥ इति श्रमरवात्भ्रष्टत्वरापयंकर्म
ब्रह्मणः ॥ श्रमात्सप दवीं चक्रे ततो ब्रह्माभवेत्तुष्टि ॥२५॥ योयो यत्कु
रुते कर्मसततयेवाभवन्नरः ॥ ततो ब्रह्मा वरं तान्प्योददौ लोकपितामहः ॥
२५॥ इदं क्षेत्रं पवन्नाम्ना लोके ख्यातिं गमिष्यति ॥ त्रिसंध्याक्षेत्रमित्ये
तत्क्षेत्राख्यानं भविष्यति ॥२६॥ नंदिकेश्वर उवाच ॥ तद्दिनान्नपरा
द्रूल त्रिसंध्याक्षेत्रमुच्यते ॥ अस्याख्यानं नरः श्रुत्वा सर्वपापैः प्रमुच्यते
२७॥ त्रिसंध्याक्षेत्रसदृशं क्षेत्रं भूमौ न विद्यते ॥ अत्र मुक्तिः श्च मुक्ति
र्पुनः पुनरपि तावत ॥२८॥ इति श्रीपद्मपुराणे त्र्यंबकक्षेत्रमाहात्म्ये
चतुर्थोध्यायः ॥४॥ नंदिकेश्वर उवाच ॥ ज्योतिर्लिंगस्य चोत्पत्तिं शृणु
श्वैतमहीपते ॥ यां श्रुत्वा मुच्यते पापात् कोटिजन्मसंमुद्भवात् ॥१॥ कदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्चित्पार्वतीशंभुं सुरतावसरे स्तुति ॥ उवाच जगतामीशं नास्ति मे सदृशी प्रभो ॥
२॥ यो भवान् जनतां कर्त्ता सिंहर्ता परिपोषकः ॥ तस्याहं सुरतं नित्यं संवाहामि ज
गत्पते ॥ ३ ॥ इति तद्वचनं श्रुत्वा लिंगवृद्धिं सदाशिवः ॥ चकार तापि चतत्र ज्ञात्वा
योनिवृद्धिमथाकरोत् ॥ ४ ॥ तौ योनिवृद्धतार वं पार्वती भामिता तदा ॥ विष्णु संस्म
रमनसा ध्यातरे हि मम मांतिकं ॥ ५ ॥ तौ ते विष्णुः समागत्य पार्वत्याः देहमावि
शत् ॥ ततो वृद्धिर्भूयोनेर्लिंगस्य च यथा सुखं ॥ ६ ॥ तरवः पशवो लोकाः पार्व
ताश्च निर्गतास्तदा ॥ संहारकालः संप्राप्तो लोका नामिव दृश्यते ॥ ७ ॥ हाहाका
रो महानासीद्देवानां तत्र धावतां ॥ पप्रच्छायं तेन नराः के चित [illegible] प्राणान्दारानपा
स्यच ॥ ८ ॥ भ्रष्टपिंभंगभयाद्ब्रह्मा महाशब्दमथो करोत् ॥ धातुमेतास्य च नं भ्रष्टत्वा वि
ष्णुः शंकरमब्रवीत् ॥ ९ ॥ किमर्थं नैति ब्रह्मायं कल्पं दे हि भ्रष्ट क्षणं ॥ वचसामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धवंङ्गात्वां शंभुर्ल्लिङ्गापरोभवत ॥१०॥ एतस्मिन्नंतरे तत्र ब्रह्मागत्य जगद्गुरूः ॥
तुष्टाव स्तुतिभिर्देवो सृष्टिसंरक्षणाय च ॥११॥ यौ तौ शंख कपाल भूषितक
रौ माल्लास्थिमाल्लाधरो देवो द्वारवतीस्मषा न निक्वयो नागारिगोवाहनो ॥
द्वि व्यक्षो बलिदक्षयज्ञमथनौ श्रीशैलजावल्लभौ पापं वो हरतामुभौ ह
रिहरौ श्रीवत्स गंगाधरौ ॥१२॥ इति धात्रा स्तुतौ देवौ प्रोचतुर्विष्णुशंकरौ ॥
अवयोश्चरितं नूनं परोपकरणाय च ॥१३॥ इदं यो नियुतं लिंगं हत्या द्वाद
।।१५ शधाछिन्नतो ॥ स्थापयेस्यावयोः प्रीत्यै परोपकरणानि च ॥१४॥ नंदिकेश्वर ॥ ब्र १५॥
ह्मास्त्रेणतातो ब्रह्मा हत्या द्वादशधाछिन्नो ॥ स्थापयामास सल्लोके कर्म
णापि तो हि सा ॥१५॥ छिन्नं यदाहितल्लिंगं ज्योतिर्यस्मात् पपात ह ॥ ज्योति
र्लिंगानि तान्याहुर्ब्रह्मा घादे च नागरा ॥१६॥ विस्फुलिंगा स्ततो जग्मुर्गगने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वादशप्रभो॥ लोकेषु द्वादशादित्या दाहं च कुर्यथासुखं॥१८॥ ततो ब्रह्मा वदत्ने
श्यामासिमासितपस्य च॥ एकैकं एवयत्नेषु भागं गृह्णंत भास्करः॥ तेषां द्वा
दशलिंगानां मेकं चापि न पोचामा॥१८॥ ये पठंति नरा राजन् न तेयां तिपर्मा
लयं॥ तेषां नामानि राजेंद्र कथयामि तवाग्रतः॥१९॥ त्र्यंबकं शंकरश्चैव घु
सृणेशस्तथैव च॥ विश्वेश्वरो महाकालो नागेश्रो मल्लिकार्जुनः॥२०॥ रामे
श्वरः सोमनाथश्च केदारश्च तथैव च॥ वैजनाथो नागनाथ ॐकारममलेश्व
रः॥२१॥ इति द्वादश लिंगानां नामानि कथितानि ते॥ येषां श्रवणमात्रेण स्व
र्गे मुच्यते वन संशयः॥२२॥ ज्योतिर्लिंगस्य निर्माल्यं नैवेद्यं तीर्थमेव च॥ ये
गृह्णंति नरा राजन् तेषां मुक्तिर्न संशयः॥२३॥ यस्तु एप भूमिदानेन राजसूय
न यत्फलं॥ एकस्य ज्योतिर्लिंगस्य तत्फलं दर्शनेस्मृतं॥२४॥ इहार्थे कथये[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्यामि कथामेकां पुरातनां ॥ अवंति नाम नगरी तस्यां राजा पुराभवत् ॥ २५ ॥ चंद्रसेन
इति विख्यातो धनलोभी नृपोधमः ॥ द्विजान् धनसंपन्नान् आनीयानियपापकृत्
॥ २६ ॥ हत्वा जग्राह नूतं द्रव्यं कंकणादि तथैव च ॥ सुरापानरतो नित्यं परस्त्रीषु
रतः सदा ॥ २७ ॥ धर्मे पराङ्मुखो नित्यं प्रजानां गृहे धनं ॥ एवं हि वर्तमानस्य रा
दाम्युतं पयो ॥ २८ ॥ कदाचित्स नृपः स्वप्ने ह्यात्मानं संददर्श हि ॥ यमदूतैर्नी
यमानं बद्धापाशैः सुदारुणैः ॥ २९ ॥ ताड्यमानं च बहुशः क्षुधार्तमकिंचनं ॥ इ
त्य स्वप्नं समालोक्य नृपः परमदुःखितः ॥ ३० ॥ प्रातःकाले समुत्थाय वशिष्ठस्य
गृहं ययौ ॥ वशिष्ठं प्रणिपत्याथ सर्वं तस्मान्यवेदयत् ॥ ३१ ॥ आबाल्याच्चनि
जं कर्म सर्वं तस्मै स शंसहे ॥ किं करोमि ति परीपप्रच्छपादौ धृत्वा द्विजन्मनः ॥ ३२ ॥
ज्ञात्वा कर्मगति तस्याथ वशिष्ठो ज्ञानचक्षुषा ॥ अयं ब्रह्महत्यानां गोहत्या
ते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नं: ३

नोतपार्बुदं ॥३३॥ इत्यादिपापराशिंसज्ञात्वाप्राहद्विजत्तमः ॥ वशिष्ठ० ॥
प्रायश्चित्तं नृपश्रेष्ठ स्मृतके नास्ति ते क्वचित् ॥३४॥ आलोक्य सर्वशा
स्त्राणि विचार्य च पुनः पुनः ॥ इदं निःकारितं तुभ्यं प्रायश्चित्तं नराधिप ॥
३५॥ पश्य द्वादशलिंगानि त्र्यंबकादिनिष्फलब्धे ॥ तेषां दर्शनमात्रेण पापं
त वगमिष्यति ॥३६॥ हस्तद्वादशसंख्याकं वस्त्रं नीलि युतं कुरु ॥ नंदिके०
द्र इति तद्वचनं श्रुत्वा चंद्रसेनो महिपतिः ॥३७॥ नीलीवस्त्रसमादाय लिं
गानि द्रष्टुमायपयौ ॥ दृष्ट्वा वे दशलिंगानि निःपापोभून्नराधिपः ॥३८॥
वस्त्रं श्वेतत्वमापन्नं नष्टा वाणी जगाद ह ॥ निःपापोसि नृपश्रेष्ठ वि
मानं पश्य ते तिके ॥३९॥ नंदिकेश्वर० ॥ चंद्रसेनो नृपश्रेष्ठ विमानं प्राप्य
तादृशं ॥ अनेनैव स्वदेहेन शिवलोकं जगाम ह ॥४०॥ इति ज्योतिर्लिंगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांम हिमाकथितस्तव ॥ यः श्रृणोति नरो भक्त्या पठेद्वापि समाहितः ॥४१॥
स सर्वकिल्बिषं हित्वा याति शंभोः सलोकतां ॥ इति श्रीपद्मपुराणे त्र्यंब
कक्षेत्रमाहात्म्ये पंचमोध्यायः ॥५॥ नंदिकेश्वर० ॥ ब्रह्माद्रिस्त्र्यंबकः सा
क्षात् सर्ववेदेषु पठ्यते ॥ अयं नीलगिरिस्तस्य वामभागे प्रकीर्तितः
॥१॥ तत्र स्थिता जगन्माता पार्वती लोकगुप्तये ॥ सिद्धिक्षेत्रमिदं पुण्यं
दत्तस्याध्यपकारकं ॥२॥ अत्र तेपुस्तपस्तीव्रं मुनयः सनकादयः ॥ भ १८
२८॥ वानीमत्र पश्यंति नीलपर्वतवासिनीं ॥३॥ न ते संसारचक्रेषु भ्रमंति मुक्ति
भागिनः ॥ यया दृष्टा जगन्माता नीलपर्वतवासिनी ॥४॥ स सप्तजन्मसु
वैधव्यं न स्यात् तस्याः कदाचन ॥ सोपत्यागपैलस्ततेषु त्रान् धनधान्यस
मन्वितान् ॥५॥ अंते शिवपुरीं प्राप्य पार्वत्या सह मोदते ॥ पार्वत्यानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मितं तीर्थं नीलगंगे निविश्रुतं ॥ तत्र स्नानं च दानं च कोटियज्ञफलप्रदं ॥
इहार्थे कथइष्यामि कथामेकां पुरातनीं ॥८॥ यां श्रुत्वा मुच्यते पापात्
कोटियज्ञस्य पुण्यवान् ॥ तीर्थे त्रयं हरिं साक्षात् वसते नीलपर्वते ॥९॥
पप्रच्छुतं मुनिं गत्वा राजा माहिष्मतीपतिः ॥ मुने सर्वाणि तीर्थानि स्यात्का
र्यं नीलपर्वते ॥ २ ॥ कथं तिष्टंति विप्र तत्र तन्मे गदितुमर्हसि ॥ दत्तात्रेय उ
वाच ॥ अत्रास्ति सिद्धिर्मया लब्धा सिद्धक्षेत्रमिदं परं ॥१०॥ आलोडिता
वसुमती गिरयः समस्तानि क्षाद्रि तुल्यं मपरं न विलोकयामि ॥ सिद्धिप्र
दं गिरिवरं त्वसुतानरूपायाः प्राप्तिं करोति सनकादिमुनीद्रवासं ॥११॥
त्वमप्यत्र तपः कृत्वा सिद्धिं प्राप्नुहि भूपते ॥ नंदिके ॥ इति तस्य वचः श्रुत्वा
कार्तवीर्यो महीपतिः ॥१२॥ भगवत्याः कृपाकामरत्नो पपरमं तपः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्यन्नैवकाष्ठेन नीलांबरेणुकातदा ॥१३॥ प्रस्यंदमलंतमागत्यसाराद्रि
सिद्धिंदाभवत् ॥ परशुरामोपितत्रैवसिद्धिंप्राप्तोन्नृपोत्तम ॥१४॥ नीलपर्वतवासि
न्यारेणुकापापःप्रदांबुजं ॥ येपश्यंतिनराराजन्नतेयांतिपुनर्भवं ॥१५॥ नीलप
र्वतमहात्म्यंकथितंतेमयानघ ॥ यःशृणोतिनरोभक्त्यासोपिपापैःप्रमुच्यते
॥१६॥ इतिश्रीपद्मपुराणेत्र्यंबकक्षेत्रमाहात्म्येषष्ठाध्यायः ॥६॥ नंदिकेश्वर० ॥
गौतमाश्रमइत्याख्या याभवद्येनहेतुना ॥ तंहेतुंसंप्रवक्ष्यामिशृणुश्वेतम
हीपते ॥१॥ प्रयागेजतोधात्राभूमिकर्षणकारिणा ॥ कांचनीपेटिकालब्धा
तस्यांकन्यामपश्यत् ॥२॥ साकन्यातीवचार्वंगीरूपयौवनशालिनी ॥ तां
दृष्ट्वाविस्मिताःसर्वदेवताइतिसत्तमः ॥३॥ स्वश्रेष्ठपृथिकसौंदर्यंतस्याद्द
ष्ट्वाप्रजापतिः ॥ कस्मैदेयामयाकन्यामनेस्पेवंविचिंतयत् ॥४॥ तांदृष्ट्वाचा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुसर्वांगी चक्षुमे देवता गणाः ॥ सर्वे सुंदररूपाणि धृत्वा देवाः सवासवाः ॥५॥
एतस्मिन्नंतरे नत्रवागुवाचाशरीरिणी ॥ इयं पश्यमेः सुतासाक्षात्तत्तवहस्त
गतापिमां ॥६॥ वांछति यदि सर्वेपि दिव्याक्कावासवादयः ॥ परिक्रम्य महीं
५४ सर्वां सप्तद्वीपां सपर्वतां ॥७॥ पश्चात् प्रहरमात्रेण यः पूर्वं संप्रयास्यति ॥ तस्मै
देया मया कन्या नास्त्यत्रापि विचारणा ॥८॥ नंदिकेश्वर उवाच ॥ इत्या
कर्ण्य नभोवाणीं देवाः सर्वे प्रतिस्थिरे ॥ अहं पूर्वमहं पूर्वमित्युक्त्वा पर
स्परं ॥९॥ पृथ्वी प्रदक्षिणीं कर्तुं यपुः सर्वे दिवौकसः ॥ गौतमोपि स्नानैः पश्चा
त्तनीर्जगामप्रपागतः ॥१०॥ एतस्मिन्नंतरे मार्गे धेनुं प्रसवशालिनीं ॥
दृष्ट्वा संस्मार वेदीयमाख्यानं सम महामुनिः ॥११॥ प्रदक्षिणात्रयं कृत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रयागं पुनरायये ॥ गोलमुद्राच ॥ परिक्रम्य महीं सर्वां साब्धि द्वीपां सपर्वतां
॥१२॥ अहं पूर्वं प्रयातोस्मि मह्यं कन्या प्रदीयतां ॥ इति गौतम वाक्यं तु श्रुत्वा ब्र
ह्मा ब्रवीद्वचः ॥१३॥ शीघ्रमेव प्रयातोसि कथं दृष्टा प्रदक्षिणा ॥ एतस्मिन्नं
वागु तरे तत्र वाग् वाचाशरीरिणी ॥१४॥ माविचारय पद्मोद्भ तेऽकन्यां देहि द्विजन्मने ॥
प्रदक्षिणा त्वयं तेन कृतं क्षेमेण संशयः ॥१५॥ यावदर्धप्रसूता गौस्तावत्सा
पृथिवी समा ॥ शूद्रानं तेन दत्तोस्या ताद्दत्रीं गां ददाति यः ॥१६॥ इत्याकर्ण्य
१० न वाचो वाणीं ब्रह्मा लोक पितामहः ॥ गौतमाय ददौ कन्यां वेदोक्त विधीना
ततः ॥१७॥ जाते विवाहे कन्यायाः परिक्रम्य वसुंधरां ॥ प्रपयौ देवताः १०
सर्वा ददृश्च दंपती पुरः ॥१८॥ इंद्रस्तु दुःखितो भूत्वा तत्र हीमासीं द्विषः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खंलीमाहा ११

पुरः॥ इति श्रुत्वा देवताः सर्वा अहिल्येतिततो विदुः॥१९॥ गौतमाय सुतां दत्वा
धाता वचनमब्रवीत्॥ सह्याद्रिः प्रथमो मूर्धा वसन्नाद्रिरितिविश्रुतः॥२०॥
तत्रास्ते त्र्यंबकं साक्षात् सर्वैः देवगणैः सह॥ मयातत्र तपस्तप्त्वा सिद्धिः
प्राप्ता महामुने॥२१॥ तथा त्वमपि तत्रैव सिद्धिं प्राप्नुहि भूपते॥ इति धातु
र्वचः श्रुत्वा गौतमो भार्यया सह॥२२॥ त्र्यंबकाद्रिं समासाद्य तपस्तेपे
तिदारुणं॥ शंकरस्य प्रसादेन शाश्वतीं सिद्धिमाप्तवान्॥२३॥ ततः प्रभृ
तितत्क्षेत्रं गौतमाश्रमसंज्ञकं॥ कोटितीर्थस्य नाम्नापि गौतमात्र्यंबेश्वर
वह॥२४॥ गौतमाश्रमसंज्ञायाः हेतुस्तेकपिलामया॥ गंगादिसर्वतीर्थो
नां समुत्पत्तिमतः शृणु॥२५॥ इति त्र्यंबकक्षेत्रमाहात्म्ये सप्तमोध्यायः॥७॥
नंदिकेश्वर उवाच॥ सदाशिव विवाहे तु ब्रह्मा याग्यासीत् पुरोहितः॥ अश्म

नःस्पर्शहेतोस्त्वं देव्यंगुष्ठमपास्यत्रात् ॥१॥ देव्यंगुष्ठं समालोक्य कामाकुलि
तचेतसः ॥ धातुर्वीर्यं प्रचस्कंदे ते मनपश्यां प्रच्छादितं ॥२॥ जथापि जल्पिते
तस्मात् बालखिल्यामहर्षयः ॥ अथायोमेरवाम्भवत्ब्रह्मा लज्जितोतेन
कर्मणा ॥३॥ हाहा कारो महानासीत् देवानां तत्र पश्यतां ॥ ततः प्रदुःखि
तो ब्रह्मा उच्छापत्रपयोततुः ॥४॥ हरं पाश्चितस्तदा शंभुर्नंदिनं प्रस्थवाच
ह ॥ शंभुरुवाच ॥ आकापरे विधिं नंदिन् तस्मै शुद्धिं ददाम्यहं ॥५॥ अ
नीतेनं दिनातत्र विधोश्शुद्धिं ददौ हरः ॥ पृथिव्याः सारमादाय कमंड
लुमकल्पयत् ॥६॥ आपां सारं समादाय तत्र तीर्थमकल्पयत् ॥ पाव
मान्यादिभिः सूक्तैरभिमंत्र्य पुनः पुनः ॥७॥ त्रैलोक्यपावितं शांतिं
तत्र तस्मात् पापहे ॥ धात्रे कमंडलुं दत्वा शंभुर्वचनमब्रवीत् ॥८॥ यदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५८

तेषु चिताषापंबुद्धिं पापिपकर्मेणि ॥ कमंडलुगतं वारि तदास्मरमहामते ॥९॥
स्पृतमालोकितं वारिध्यतं वा शिरसा विधे ॥ ब्रह्महत्यादिपापानि नाशयेत्येव निश्चितं ॥१०॥ अहमप्यस्य महात्म्यं वक्तुं नैव क्षमो यदा ॥ ११ तादृशा
णां देवानां वर्णनेत त्र का कथा ॥११॥ अतो मम माज्ञया ब्रह्मन् गृहाण मंक
मंडलुं ॥ नंद्युवाच ॥ इत्युक्तेन नंदिना तत्र जयेत्यूचुः सुराः मुहुः ॥१२॥ पुण्यव
ऽ्रिय स्त्रेन्मूर्ध्नि विधातुः शंकरस्य च ॥ जाते बहुतिथे काले शंकरो लोकशंकरः ॥१३॥ क५
कैलाससदनं हित्वा गार्हस्याश्रममन्वपद्यत ॥ कार्त्तिके पंचसुतं लेभे गणेशं
च सदाशिवः ॥१४॥ यस्मिन्नेव सदेव्याः विवाहः संबभूव ह ॥ तस्मिन्नेव स
मुत्पन्ना गंगा देवी हरप्रिया ॥१५॥ रसवत्यां महादेवो निरंध्यापतितां ह
दि ॥ बवे समुन्नातिं दृष्ट्वा देवाः शक्रपुरोगमाः ॥१६॥ क्षीरसागरमागत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुष्टुवुः परमेश्वरं ॥ स्तोत्रैर्नानाविधैर्दिव्यैर्विष्णुसूक्तैरनेकधा ॥१७॥ ततः प्र
सन्नो भगवान्विष्णुः प्राह सुरान्प्रति ॥ विदितं भवतां कार्यं यूयं गच्छंतु निर्ज
राः ॥१८॥ सोपि मद्भक्तिमापन्नो वधं नेच्छामि तस्य हि ॥ कश्यपस्य सुतो भू
त्वा वामनो नामनामतः ॥१९॥ भवद्धितं करिष्यामि तं च नेष्ये रसातलं ॥ इ
त्युक्ते देवदेवेन स्वाधिकारानियपुः सुराः ॥२०॥ विष्णुः कश्यपभार्याया
मदित्यां गर्भमाविशत् ॥ अदितिः सुषुवे पुत्रं शंखचक्रगदाधरं ॥२१॥ २१
२१ पीतांबरं चतुर्बाहुं सर्वाभरणभूषितं ॥ विश्वेशं तनयं दृष्ट्वा कश्यपो विस्मि
तोभवत् ॥२२॥ प्रभवान्जगतां कर्ता संहर्ता पोषकस्तथा ॥ यस्य कुक्षौ
जगत्सर्वं ब्रह्मांडं याति प्रतिष्ठितं ॥२३॥ स कश्यपमपुत्रत्वमहा लोकविडंब
ने ॥ विष्णुरूपाच ॥ पूर्वं तु वितपा नाम त्यज्ञायो प्रभिरुच्यते ॥२४॥ आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिष्टो ब्रह्मणा सर्वेयु वाञ्छयां महत्तपः ॥ मपि प्रसन्नो भवद्ध्यो प्रार्थितो मादरात्सुतः ॥
२५ ॥ इदं तां दर्शितं रूपं प्राग्जन्ममरणापह ॥ इत्युक्तो लोकनाथोथ वत्स व
प्रादस्तद्दिवः ॥२६॥ जातनामादिसंस्कारानुकूरूपो विदधेत तः ॥ ततः स
वामनः छत्री दंडी कुंडलवान् प्रभुः बलेर्बलवतो यज्ञं जगाम बहुदक्षिणं ॥
बलिश्चिंतयेते नित्यं लोकनाथसदा हृदि ॥२८॥ स्वच्छिस्वातनमध्येहं वद वि
प्र किं दीयतां मे दिनी कामाग्रामपवित्रकमत्रेयपदं देचो जलेपातितो ॥ मा
हीस्तु शानाब्रवीद्धरिरयं पात्रं किमस्मात्परं इत्येवं बलिनार्चितो मरवमु
खपाय्यानि वोवामनः ॥२९॥ जलं गृहीत्वास्य करे वामनो विदधे तदा ॥ कूर्म
पृष्ठपदं न्यस्य द्वितीयं ब्रह्मणः पदे ॥३०॥ तृतीयस्य स्थलं नास्ति बलेः ए
वपदं ददौ ॥ बलिं सपरिवारं तं पाताळमनयद्विभुः ॥३१॥ ब्रह्माविष्णुपदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वास्य पदे समुपागते ॥ अस्य पूजा मया कार्या प्रेक्ष्य संविदधे मतिं ॥ ३२ ॥ सर्व
स्वमात्मनो वारि कमंडलुगतं विधिः ॥ अर्घ्यार्थं कल्पयत्तस्य ब्रह्मा लोकपि
तामहः ॥ ३३ ॥ ततस्तत्पतितं वारि मेरौ मूर्ध्नि नराधिप ॥ चतुर्द्धा व्यभवत्पूर्वे
पश्चिमे दक्षिणोत्तरे ॥ ३४ ॥ दक्षिणे पतितं पत्तु जटाभिः शंकरो वा लीत ॥
पश्चिमे पतितं यत्तु जटाभिः शंकरो गृहीत ॥ ३५ ॥ उत्तरे पतितं विष्णुर्जं
ग्राह तोऽजले ॥ पूर्वस्मिन्नेष यो देवाः पितरो लोकपावकाः ॥ जगृहुः शुभ
दं वारि तस्मात्स्पृष्टं न दृश्यते ॥ पादक्षिणां दिशं प्राप्ता आपो वै लोकमातरः ॥
३६ ॥ विष्णुपादप्रसूता स्ता ब्राह्मया वै लोकमातरः ॥ महेश्वरजटासंस्था ए
वं जाता शुभोदयः ॥ ३८ ॥ तासां प्रभावस्मरणात्सर्वान्कामानवाप्नुवा
न् ॥ नंदिकेश्वर उवाच ॥ यथानीता पुरा तेन गौतमेन महर्षिणा ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्सर्वं विस्तरेणाहं वदिष्ये प्रीतये तव ॥ यस्मिन् लोके सुरेशस्य शंभोरुमापत्न्या भवत्प्रिया ॥४० ॥ तस्मिन्नेवाभवत् गंगा प्रिया शंभोर्महामते ॥ धातुर्दोषाश्च नु स्पर्धं चिंतयानः सदाशिवः ॥४१ ॥ उमया सहितः श्रीमान् देवी प्रेक्ष्य विशेषतः ॥ रसा च तौ स्थितौ यस्मात् निर्ममे रससमुच्चमं ॥ रसवत्यास्त्रिय तां च स्त्रेणत्या वपावनेत्यतः ॥ सर्वाभ्योप्याधिका प्रीत्या गंगा सन्मुनिसत्तम ॥४२ ॥ तामेव चिंतयानो सौ सा सदा स्तो महेश्वरः ॥ स एव गंगा जटामागात् कस्मिंश्चित् कारणांतरे ॥४४ ॥ स तु संतोषयामास गंगां शंभुर्जटास्थितां ॥ शिरसा च धृतां ज्ञात्वा न शशाक उमा तदा ॥४५ ॥ सोढुं ब्रह्मन् जटाजूटे स्थितां दृष्ट्वा पुनः पुनः ॥ अमर्षेण भवं गौरी प्रेक्ष्य त्वेवमभाषत ॥४६ ॥ नैवासौ शाहिणोत्तरां शंभुरसिको रससमुच्चमं ॥ उमा तदा च दुःखार्त्ता हसमीति च वैतदा ॥४७ ॥ जयास्य च तदा देवी गोपयंते विमरस्य च ॥ विनायकं जयास्कंदं रहो वाक्यमथाब्रवीत् ॥४८ ॥
नैवायं त्रिदशेशानेन गंगा जतिपुत्रके ॥ स्तापि प्रियास्य

शिवस्याघात्कथं त्यजति तां प्रियां ॥४९॥ एवं विमृश्य बहुशो गौरी प्राह विनायकं ॥ न
देवैर्नासुरैर्यक्षैर्नैराजाप्यरथापि वा ॥५०॥ भवतां न तथैवैषा गंगा त्यजति सप्र
भुः ॥ पुनस्तस्यापि वा गत्या हिमवंतं नगेश्वरं ॥५१॥ अथवा ब्राह्मणरोषात् पुण्ये स्त्रापि ति
हेत किल्बिषे ॥ तेन जटास्थिता गंगा प्रार्थिता भुवमानुयात् ॥५२॥ एतच्छ्रुत्वा मा
तुः कौ वा मातः प्राह विघ्नराट् ॥ त्वत्रास्कंदेन जयया संमंत्र्येह च युज्यते ॥५३॥
२२ तत्कर्म्मि मिस्त्त्रकाव् गंगां यथा त्यजति मत्पिता ॥ नंदिकेश्वर उवाच ॥ एतस्मिन्नंत २२
राजेन अनावृष्टिरजायत ॥५४॥ द्विद्वादशसमा मर्त्ये सर्वप्राणिभयंकरा ॥ त
तो विनष्टमभवत् जगत्स्थावरजंगमं ॥५५॥ विनातु गौतमं पुण्यं आश्रमं सर्वका
मदं ॥ सृष्टुकामः पुरा विश्वं स्थावरं जंगमं तथा ॥५६॥ हरे तोयपूर्णो विधात्रा वेतद्द
वयजनं हरः ॥ तन्नाम्ना सतु विख्यातस्ततो ब्रह्मगिरौ शुभे ॥५७॥ अथ पाप्या [illegible]
यो वापि दुर्भिक्ष्यं वाप्य वर्षणं ॥ अपंकं शोकदारिद्र्यं न श्रूयंते कदाचन ॥५८॥ नदाश्रमं वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विनान्यत्र हव्यं वा कमेव वा ॥ नास्ति भ्वेत तथा दाता होता यश्च कदाचन ॥ ५९ ॥ यद्देवं गौ
